# रामकृष्ण विलोम काव्यम्

raamakR^ishhNa viloma kaavyam.h

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम् ॥ १॥
चिरं विरंचिर्न चिरं विरंचिः साकारता सत्यसतारका सा ।
साकारता सत्यसत्यसतारका सा चिरं विरंचिर्न चिरं विरंचिः ॥ २॥
तामसीत्यसति सत्यसीमता माययाक्षमसमक्षयायमा ।
माययाक्षसमक्षयायमा तामसीत्यसति सत्यसीमता ॥ ३॥
का तापघ्नी तारकाद्या विपापा त्रेधा विद्या नोष्णकृत्यं निवासे ।
सेवा नित्यं कृष्णनोद्या विधात्रे पापाविद्याकारताघ्नी पताका ॥ ४॥
श्रीरामतो मध्यमतोदि येन धीरोऽनिशं वश्यवतीवराद्वा ।
द्वारावतीवश्यवशं निरोधी नयेदितो मध्यमतोऽमरा श्रीः ॥ ५॥
कौशिके त्रितपसि क्षरव्रती योऽददादऽद्वितनयस्वमातुरम् ।
रन्तुमास्वयन तद्विदादयोऽ तीव्ररक्षसि पतत्रिकेशिकौ ॥ ६॥
लम्बाधरोरु त्रयलम्बनासे त्वं याहि याहि क्षरमागताज्ञा ।
ज्ञातागमा रक्ष हि याहि या त्वं सेना बलं यत्र रुरोध बालम् ॥ ७॥
लङ्कायना नित्यगमा धवाशा साकं तयानुन्नयमानुकारा ।
राकानुमा यन्ननु यातकंसा शावाधमागत्य निनाय कालम् ॥ ८॥
गाधिजाध्वरवैरा ये तेऽतीता रक्षसा मताः ।
तामसाक्षरतातीते ये रावैरध्वजाधिगाः ॥ ९॥
तावदेव दया देवे यागे यावदवासना ।
नासवादवया गेया वेदे यादवदेवता ॥ १०॥
सभास्वये भग्नमनेन चापं कीनाशतानद्धरुषा शिलाशैः ।
शैलाशिषारुद्धनताशनाकी पञ्चानने मग्नभये स्वभासः ॥ ११॥
न वेद यामक्षरभामसीतां का तारका विष्णुजितेऽविवादे ।
देवाविते जिष्णुविकारता का तां सीमभारक्षमयादवेन ॥ १२॥
तीव्रगोरन्वयत्रार्यो वैदेहीमनसो मतः ।
तमसो न महीदेवैर्यात्रायन्वरगोव्रती ॥ १३॥
वेद या पद्मसदनं साधारावततार मा ।

मारता तव राधा सा नन्द सद्मप यादवे ॥ १४ ॥
शैवतो ह्ननेऽरोधी यो देवेषु नृपोत्सवः ।
वत्सपो नृषु वेदे यो धीरोऽनेन ह्तोऽवशैः ॥ १५ ॥
नागोपगोऽसि क्षर मे पिनाकेऽ नायोऽजने धर्मधनेन दानम् ।
नन्दानने धर्मधने जयो ना केनापि मे रक्षसि गोपगो नः ॥ १६ ॥
ततान दाम प्रमदा पदाय नेमे रुचामस्वनसुन्दराक्षी ।
क्षीरादसुं न स्वमचारु मेने यदाप दाम प्रमदा नतातः ॥ १७ ॥
तामितो मत्तसूत्रामा शापादेष विगानताम् ।
तां नगाविषदेऽपाशा मात्रासूत्तमतो मिता ॥ १८ ॥
नासावद्यापत्रपाज्ञाविनोदी धीरोऽनुत्या सस्मितोऽद्याविगीत्या ।
त्यागी विद्यातोऽस्मि सत्त्यानुरोधी दीनोऽविज्ञा पात्रपद्यावसाना ॥ १९ ॥
संभावितं भिक्षुरगादगारं याताधिराप स्वनघाजवंशः ।
शवं जघान स्वपराधिताया रङ्गादगारक्षुभितं विभासम् ॥ २० ॥
तयातितारस्वनयागतं मा लोकापवादद्वितयं पिनाके ।
केनापि यं तद्विदवाप कालो मातंगयानस्वरतातियातः ॥ २१ ॥
शवेऽविदा चित्रकुरङ्गमाला पञ्चावटीनर्म न रोचते वा ।
वातेऽचरो नर्मनटीव चापं लामागरं कुत्रचिदाविवेश ॥ २२ ॥
नेह् वा क्षिपसि पक्षिकंधरा मालिनी स्वमतमत्त दूयते ।
ते यदूत्तमतम स्वनीलमाराधकं क्षिपसि पक्षिवाह्ने ॥ २३ ॥
वनान्तयानस्वणुवेदनासु योषामृतेऽरण्यगताविरोधी ।
धीरोऽवितागण्यरते मृषा यो सुनादवेणुस्वनयातनां वः ॥ २४ ॥
किं नु तोयरसा पम्पा न सेवा नियतेन वै ।
वैनतेयनिवासेन पापं सारयतो नु किम् ॥ २५ ॥
स नतातपह्ा तेन स्वं शेनाविहितागसम् ।
संगताह्िविनाशे स्वं नेतेह्ाप ततान सः ॥ २६ ॥
कपितालविभागेन योषादोऽनुनयेन सः ।
स नये ननु दोषायो नगे भाविलतापिकः ॥ २७ ॥
ते सभा प्रकपिवर्णमालिका नाल्पकप्रसरमभ्रकल्पिता ।
ताल्पिकभ्रमरसप्रकल्पना कालिमर्णव पिक प्रभासते ॥ २८ ॥
रावणेऽक्षिपतनत्रपानते नाल्पकभ्रमणमक्रमातुरम् ।

रन्तुमाक्रमणमभ्रकल्पना तेन पात्रनतपक्षिणे वरा ॥ २९ ॥

दैवे योगे सेवादानं शङ्का नाये लङ्कायाने ।
नेयाकालं येनाकाशं नन्दावासे गेयो वेदैः ॥ ३० ॥

शङ्कावज्ञानुत्वनुज्ञावकाशं याने नद्यामुग्रमुद्याननेया ।
याने नद्यामुग्रमुद्याननेया शंकावज्ञानुत्वनुज्ञावकाशम् ॥ ३१ ॥

वा दिदेश द्विसीतायां यं पाथोयनसेतवे ।
वैतसेन यथोपायं यन्तासीदऽविशदे दिवा ॥ ३२ ॥

वायुजोऽनुमतो नेमे संग्रामेऽरवितोऽह्नि वः ।
वह्नितो विरमे ग्रासं मेनेऽतोऽमनुजो युवा ॥ ३३ ॥

क्षताय मा यत्र रघोरितायुरङ्कानुगानन्यवयोऽयनानि ।
निनाय यो वन्यनगानुकारं युतारिघोरत्रयमायताक्षः ॥ ३४ ॥

तारके रिपुराप श्रीरुचा दाससुतान्वितः ।
तन्वितासु सदाचारु श्रीपुरा पुरि के रता ॥ ३५ ॥

लङ्का रङ्कांगराध्यासं याने मेया काराव्यासे ।
सेव्या राका यामे नेया संध्यारागाकारं कालम् ॥ ३६ ॥

॥ इति श्रीदैवज्ञपण्डित सूर्यकवि विरचितं
विलोमाक्षररामकृष्णकाव्यं समाप्तम् ॥

---

Send corrections to P. P. Narayanaswami at swami@math.mun.ca